शास्त्री तृतीय खण्डस्य कृते (साहित्यम्)

## मेघदूतस्य महत्त्वम् प्रतिपादनम्

'रमणीयार्थ प्रतिपादकः शब्दः काव्यम्' इति पण्डितराज जगन्नाथस्योक्त्या काव्यत्वं नाम रमणीयार्थ प्रतिपादकत्वे सति सहृदय हृदयाह्लादकत्वम्। काव्यं द्विविधं - दृश्य - श्रव्यभेदात्। श्रव्यकाव्यं त्रिविधं - गद्य पद्य चम्पूभेदात्। पद्य काव्यं त्रिविधं - महाकाव्य - खण्डकाव्य - कोषभेदात्।

मेघदूतं खण्डकाव्यमस्ति, खण्डकाव्यं भवेत् काव्यस्यैकदेशानुसारि चेति साहित्य दर्पणोक्त लक्षणात्, आलंकारिक आदि ~~कवि~~ कवेरनुयायिनः एतन्महाकाव्य रूपेण पाश्चात्या विद्वांसश्चैतद् गीति काव्यं रूपेण स्वीकुर्वन्ति। मेघदूतस्य द्वौ भागौ स्तः - पूर्वमेघोत्तरमेघभेदात्। मेघदूतस्य नायको यक्षः, धीरः, प्रशान्तः, स्वस्वामेव नायिकायामासक्तत्वादनुकूलो नायकोऽस्ति। नायिकास्त्रिविधाः - स्वकीया, परकीया, साधारणी चेति। तत्र यक्ष पत्नी स्वकीया नायिका, तत्पतिः प्रवासी वर्तते, अतः सा प्रोषितभर्तृकाऽपि।

मेघशब्दस्य किंचन्यमित्यन्तजनाऽस्ती सहृदयाः प्रमाणम्। मेहति, वर्षति, वर्षणेन आतप परिहारं करोति इति व्युत्पत्ति पक्षे मेघदूतं विधाय मेघदूत द्वारा मौलिकवाद धर्म सन्तप्तानां जनानां छायाप्रदानं कृत्वा कामनो वर्षणं कृतमस्ति। वैदर्भी रीतिः माधुर्य प्रसादौ वा गुणः सर्वथा आवर्जयति मनांसि काव्यरसिकानां पाठकानाम्। ~~अत्र~~ अत्रत्योपमा - उत्प्रेक्षा काव्यलिङ्ग, आदि अलङ्काराः अपरिहार्य रूपेणाङ्गित्वेन प्रतिपादिताः सन्ति। अर्थान्तरन्यासस्तु किमपि विशिष्टमेव महत्वं स्थापयति सहृदयानां हृदये।

एवं स्वकीय काव्य गुणैः नूतन विद्या प्रवर्तकत्वेन च मेघदूतस्य वैशिष्ट्यं स्पष्टमेव दरीदृश्यते तराम्। इति।

उपेन्द्र झा
1/11/20
शा० प्रो० साहित्य
रा० उ० सं० महावि०
मुरैना, ऽरीयो

शास्त्री द्वितीय खण्डस्य कृते (साहित्यम्)

वेणीसंहार नाटकस्य श्लोक व्याख्या।

'मन्थायस्तार्णवाम्भः प्लुतकुहर-चलन्मन्दरध्वानधीरः
कोणाघातेषु गर्जत्प्रलयघनघटान्योन्य संघट्ट-चण्डः।
कृष्णाक्रोधाग्रदूतः कुरुकुलनिधनोत्पातनिर्घातवातः
केनास्मत्सिंहनाद प्रतिरसित सखो दुन्दुभिस्ताडितोऽयम्॥'

प्रस्तुतोऽयं श्लोकः वीररस प्रधान कविरत्नेषु ख्यातिलब्धः महाकवि भट्टनारायणस्य अमूल्य कृतिः वेणीसंहारं नाम नाटकस्य प्रथमाङ्कात् समुद्धृतोऽस्ति। अत्र भीमस्य शौर्यं पराक्रमस्य प्रशंसयन् सहदेवः भीमोक्तिं समर्थयति नेपथ्ये कोलाहलं भवति। ततश्च भीमसेनः कथयति—

मन्थायस्तार्णवाम्भः प्लुत कुहर चलन्मन्दरध्वानधीरः कोणाघातेषु गर्जत्प्रलयघनघटान्योऽन्य संघट्टचण्डः कृष्णा-क्रोधाग्रदूतः कुरुकुलनिधनोत्पात निर्घातवातः, अस्मत् सिंहनाद प्रतिरसित सखः, अयं दुन्दुभिः केन ताडितः।

मन्थायस्तार्णवाम्भःप्लुतकुहरचलन्मन्दरध्वानधीरः— मन्थे = मन्थन क्रियायाम्, आयस्तः = क्षुब्धः, योऽर्णवः = सागरः तस्य अम्भः = जलं, तेन प्लुतं = व्याप्तं, कुहरं = छिद्रं यस्य तादृशस्य चलतः = भ्रमतः, मन्दरस्य = मन्दराचल पर्वतस्य ध्वानः = ध्वनिरिव, धीरः = गम्भीरः, कोणाघातेषु = कोणानां = दण्डानां भेरीणाम्, आघाताः = एकत्र प्रहारास्तेषु। गर्जत्प्रलयघनघटान्योऽन्य संघट्टचण्डः— गर्जन्तः = शब्दाय-मानाः, प्रलयघनानां = प्रलयकालीन मेघानां, या घटाः = पङ्क्तयः तासामन्योन्यं = पारस्परिकं यत् संघट्टः = संघर्षणम् तद्वच्चण्डः = भयङ्करः। कृष्णाक्रोधाग्रदूतः— कृष्णायाः = द्रौपद्याः, क्रोधस्य = कोपस्य, अग्रदूतः = दूरे वर्त्तुं द्योतकः। कुरुकुलनिधनोत्पातनिर्घातवातः— कुरुकुलस्य = कौरव वंशस्य, निधनं = विनाशः, तस्योत्पातसूचकः = अशुभसूचकः, यः निर्घातवातः = प्रचण्डपवनः। इव = यथा। अस्मत् सिंहनाद प्रतिरसितसखः— अस्माकं सिंहनादस्य = मृगेन्द्रगर्जनस्य, प्रतिरसितं = प्रतिध्वनितम्, तस्य सखा = मित्रम् इव। अयम् = एषः। दुन्दुभिः = भेरी ('भेर्यामानकदुन्दुभि' इत्यमरः), केन = केन पुरुषेण, ताडितः = आहतः। अत्रो-त्प्रेक्षालङ्कारः ('सम्भावनमथोत्प्रेक्षा' इति लक्षणात्) स्रग्धरा वृत्तञ्च - तल्लक्षणं यथा—
'म्रभ्नैर्यानां त्रयेण त्रिमुनियति युतं स्रग्धरा कीर्तितेयम्' इति

उपेन्द्र झा
1/11/20
एसो० प्रो० साहित्य,
रा० उ० सं० महाविद्यालय
कुरसैला, कटिहार

Nov

शास्त्रि प्रथम खण्डस्य कृते (साहित्यम्)

अभिज्ञान शाकुन्तलम् नाटकस्य श्लोक व्याख्या ।

---

"इदमुपहित सूक्ष्म ग्रन्थिना स्कन्धदेशे
स्तनयुग परिणाहाच्छादिना वल्कलेन ।
वपुरभिनवमस्याः पुष्यति स्वां न शोभां
कुसुममिव पिनद्धं पाण्डुपत्रोदरेण ॥"

प्रस्तुतोऽयं श्लोकः कविकुल कमल दिवाकरेण कविता वनिताविलासेन, कालिदासेन विरचितः अभिज्ञान शाकुन्तलम् नामधेयस्य नाटकस्य प्रथमाङ्कादुद्धृतोऽस्ति । प्रसङ्गोऽयम् तस्मिन् समये अस्ति यदा राजा कण्वाश्रमं गत्वा पादपान्तरितः सन् आश्रम वृक्षान् सिञ्चन्ती कण्वपुत्रीं शकुन्तलां पश्यति, तामसर्व धर्म नियोक्तारं महर्षिं कण्वं ... प्रतिपादयति तदा राजा तस्याः वल्कलं शिथिल शकुन्तलायाः ... स्तनयुग परिणाहच्छादि वल्कलं च दृष्ट्वा दृष्ट्वा तत्सौन्दर्यं प्रकाशयति –

स्कन्धदेशे उपहित सूक्ष्म ग्रन्थिना स्तनयुग परिणाहाच्छादिना वल्कलेन अभिनवं इदं अस्याः वपुः स्वां शोभां पाण्डुपत्रोदरेण पिनद्धं कुसुमम् इव न पुष्यति ।

उपहिता = प्राप्ता दत्तेति । स्कन्धदेशे = स्कन्धयोः प्रान्तभागे यस्मिन् तेन, सूक्ष्मा = लघुतरा ग्रन्थि = बन्धनग्रन्थि, स्तनयोः = उरोजयोः युगं = युगलम् द्वन्द्वमिति तयोः परिणाहौ = विस्तारौ आच्छादयति तच्छीलेन, वल्कलेन = वल्कलं वस्त्रभूतेनेति अभिनवं = नूतनम् अस्याः = शकुन्तलायाः इदं = दृश्यमानं वपुः = शरीरं पाण्डुपत्रोदरेण = पाण्डुपत्रमध्ये पिनद्धम् = आच्छादितं कुसुमं = पुष्पम् इव = यथा स्वां = स्वकीयां शोभां = सौन्दर्यं न पुष्यति = पुष्णाति न प्रकाशयति ।

अत्रोपमालङ्कारः शकुन्तलाशरीरस्य वल्कलाच्छादितस्य पाण्डुपत्रोदरपिनद्धेन कुसुमेन सादृश्य वर्णनात् — 'सादृश्यं सुन्दरं वाक्यार्थोपस्कारकमुपमालङ्कृतिः' इति लक्षणात् । मालिनी वृत्तम् — 'ननमयययुतेयं मालिनी भोगिलोकैः' इति लक्षणात् ।

उपेन्द्र झा
1/11/20
एसो० प्रो० साहित्य
रा० ब्र० सं० महावि०
मुरहेना, सहरसा